**संस्कृत-वार्ता:**

**दिनाङ्क :-15.08.2024**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री-स्वतन्त्रतादिवस</u>**

**अद्य राष्ट्रम् अष्टसप्ततितमं स्वतन्त्रतादिवसं आमानयति। प्रधानमन्त्री नरेन्द्रमोदी शुभावसरेऽस्मिन् दिल्ल्या: रक्तदुर्गस्थलात् देशस्य समग्रस्य नेतृत्वं विधास्यति। अपि च राष्ट्रं सम्बोधयिष्यति। अस्य वर्षस्य स्वतन्त्रतादिवस्य विषयो वर्तते- विकसितभारतं सप्तचत्वारिंशदधिकद्विसहस्रतमं इति। अत्रावसरे रक्षामन्त्रालयेन विज्ञापितं यत् समारोहोऽयं देशं विकसितं राष्ट्रं निर्मातुं नवीने दिशि प्रशासनस्य प्रयासान् सुदृढीकर्तुं मंचत्वेन कार्यं करिष्यति। रक्षाक्षेत्रमपि आत्मनिर्भरं कर्तुम् अनेकानि संशोधनानि विहितानि। अवधेयं वर्तते यत् रक्तदुर्गे आयोक्ष्यमाणे समारोहे भूयोऽपि षड्सहस्रं विशिष्टातिथय: आमन्त्रिता: सन्ति। तथा च प्रधानमन्त्री-किसान-सम्मान-निधि-योजनाया: लाभान्वितान् आहत्य सार्धद्विशतं कृषकान् अतिरिच्य प्रधानमन्त्री-फसल-बीमा-योजनाया: सार्ध द्विशतं लाभान्विता: कृषका: एतस्मिन् समारोहे सोत्साहं भागं भजिष्यन्ति। साम्प्रतिके समये सम्पन्नायां पेरिसोलम्पिक-क्रीडायां भागं स्वीकृतं भारतीयदलमपि आमन्त्रितमस्ति। विभिन्नेभ्य: राज्येभ्य: केन्द्रशासित- प्रदेशेभ्यश्च द्विसहस्रं यावत् जना: आमन्त्रिता: सन्ति।**

**<u>राष्ट्रपति:-अभिभाषणम्</u>**

**राष्ट्रपतिपदासीना द्रौपदीमुर्मु: प्रोक्तवती यत् भारतदेश: ऐक्यभावनया सह अग्रे वर्धति। स्वतन्त्रतादिवसस्य पूर्वसन्ध्यायां ह्य: स्वीये राष्ट्रसम्बोधने राष्ट्रपतिना निगदितं यत् समावेशस्य भावं देशस्य सामाजिक-जीवनस्य प्रत्येकस्मिन् पक्षे व्यावृत्तो वर्तते। अनया सबलं प्रख्यापितं यत् सामाजिकन्यायं प्रशासनस्य सर्वोच्चप्राथमिकता विद्यते। राष्ट्रपति: भारतीयसंविधाननिर्मातु: डॉ.बी.आर्. अम्बेडकरस्य उद्धरणं दत्वा उक्तवती यत् लोकतन्त्रं तावदेव स्थिरं नैव भवितुं**

शक्यते यावत् सामाजिकलोकतन्त्रम्  एतस्य मूले न भवति। राष्ट्रपति: मुर्मु: अग्रे कथितवती यत् भारतं वर्धमानासु प्रमुखार्थव्यवस्थासु अन्यतमं विद्यते। अयं च गौरववहो विषयो विद्यते यत् भारतदेशं विश्वस्य पंचमी बृहत्तमा अर्थव्यवस्थापि जाता। शीघ्रमेव तिसृषु बृहत्तमासु अर्थव्यवस्थासु समाविष्टं भविष्यति। अस्य पदक्षेपस्य सर्वं श्रेयं कृषक-श्रमि-योजनाकर्तृभ्य: उद्योगपतिभ्य: च प्रदत्तं राष्ट्रपतिना।

## वीरता पुरस्कारा:

स्वातन्त्र्यदिनस्य अवसरे आरक्षकस्य, अग्निशामकस्य, गृहरक्षकस्य, नागरिकरक्षायाः संशोधनसेवाया: च सप्तत्रिंशदधिकैकसहस्रं कर्मचारिणः वीरता-सेवा-पदकैः च पुरस्कृताः जाता: । गृहमन्त्रालयः अवदत् यत् त्रयोदशाधिकद्विशतं कर्मचारिणः वीरतापुरस्कारेण पुरस्कृताः सन्ति इति।

## रक्षामंत्री

रक्षामन्त्री राजनाथसिंह: अवोचत् यत् प्रशासनेन देशस्य रक्षाक्षेत्राय अनेकानि संशोधनानि कृतानि। स्वातन्त्र्यदिवसस्य पूर्वसन्ध्यायाम् आकाशवाण्यां सशस्त्रसैन्यबलं सम्बोधयन् श्रीसिंह: इमां वार्तां कथितवान्। असौ अग्रे निगदितवान् यत् विगतेषु दशवर्षेषु प्रायश: षड्लक्ष-कोटि-रूप्यकाणां रक्षोपकरणानि स्वदेशे स्थापितेभ्य: उद्यमेभ्य: क्रीतानि देशस्य च रक्षोत्पाद: द्विगुणं जातम्।